सुता जज्ञिरे वीर्य्यवत्तराः। दत्तातिदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः। शमी च दत्तशर्म्मा च दत्तशत्रुश्च शत्रुजित्। श्रवणा च श्रविष्ठा च स्वसारौ सम्बभूवतुः” हरिवं०३९अ०। भावे क्त। ५दाने न० “दत्तभुक्तफलं धनम्” दायभा० भारतवाक्यम्। “शरणागतसंत्राणं भूतानां चाप्यहिंसनम्। बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते” भा० शा० उक्ते ६शरणागतादित्रिके अत्र दण्डमिति लिपिकरप्रमादपाठदर्शनात् शब्दकल्पद्रुमे दण्डशब्दस्य शरणागतत्राणाद्यर्थकतोक्ता तद्दृष्ट्वैवास्माभिः दण्डशब्दस्य तदर्थकता प्रागुक्ता प्रमादकृतैव अर्थपर्य्यालोचनया तत्र “दत्तमित्यभिधीयते” इति पाठस्यैव समुचितत्वात् द्वादशपुत्रान्तर्गते ७गौणपुत्रभेदे। स च कलियुगेऽपि कर्त्तुं शक्यते “दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः” कलिवर्ज्ज्ये आदित्यपु० “दत्तपदं कृत्रिमस्याप्युपलक्षणं “औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च” कलिधर्म्मे पराशरः इति दत्तकमीमा०। अन्ये तु क्षेत्रजपदस्य औरसविशेषणत्वं कृत्रिमपदस्य दत्तकविशेषणत्वं मत्वा द्वयोरेव कलौ पुत्रत्वमिति व्यवस्थापितम्। स्वार्थे क। तत्रार्थे। तल्लक्षणं याज्ञव० “दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्” मनुरपि “माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः” इति। “आपद्ग्रहणादनापदि न देयो दातुरयं प्रतिषेधस्तथा एकः पुत्रो न देयः “न त्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेति” वसिष्ठस्मरणात्। तथानेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः। “ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः” इति तस्यैव पुत्रकार्य्यकरणे मुख्यत्वात्” मिता०।

अथ दत्तकग्रहणाधिकारादिकं दत्तकचन्द्रिकायां दर्शितं तच्चेह प्रदर्श्यते।

मनुः “अपुत्रेण सुतः कार्य्यो यादृक्तादृक् प्रयत्नतः। पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च।” अत्रिश्च “अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा। पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः”। अपुत्रेण अजातपुत्रेण मृतपुत्रेण वा। “अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च” इति शौनकसंवादात्। तेन पुत्रोत्पत्त्या “ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितॄणामनृणश्चैव स तस्माल्लब्धुमर्हतीति” मनुवचनावगते ऋणपरीहारेऽपि तत्पुत्रमरणे पिण्डोदकाद्यर्थं पुनः पुत्रकरणमावश्यकम्। अत्र पुत्रपदं पौत्रप्रपौत्रयोरप्युपलक्षणम् तयोरपि पिण्डदातृत्वंशकरत्वाविशेषात्। अन्यथा सत्यपि पौत्रे मृतपुत्रस्य निर्निमित्तपुत्रपरिग्रहापत्तिः अतः पुत्रपौत्रप्रपौत्ररहितस्यैव पुत्रीकरणमवगम्यते। अपुत्रेणेत्यत्र पुंस्त्वैकत्वयोर्विधेयविशेषणतया विवक्षितत्वम् तेन द्वाभ्यां त्रिभिर्वा नैकः प्रतिग्राह्य इति तु न देश्यं द्व्यामुष्यायणस्य द्वाभ्यां परिग्रहस्य वक्ष्यमाणत्वात्। स्त्रियाश्च भर्त्तुरनुज्ञया तदधिकारात्। यथाह वशिष्ठः “न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्त्तुरिति”। प्रतिनिधिरिति। स च क्षेत्रजादिरेकादशविधः। यथाह मनुः “क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः”। वृहस्पतिः “पुत्रास्त्रयोदश प्रोक्ता मनुना येऽनुपूर्वशः। सन्तानकारणन्तेषामौरसः पुत्रिका तथा। आज्यं विना यथा तैलं सद्भिः प्रतिनिधीकृतम्। तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना”। तत्रापि कलौ न सर्वेषामभ्यनुज्ञानम्। “अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः। न शक्यन्तेऽधुना कर्त्तुं शक्तिहीनैरिदन्तनैरिति” वचनात्। “दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः” इत्याद्यभिधाय “इमान् धर्म्मान् कलियुगे वर्ज्ज्यानाहुर्म्मनीषिणः” इति दत्तकेतरप्रतिनिधिनिषेधात् अतो दत्तकविधिर्विवेच्यते। तत्र शौनकः। “ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः। तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत्”। सपिण्डेष्विति सामान्यश्रवणात् समानासमानगोत्रेष्वित्यर्थः। तथाच सपिण्डाभावे असपिण्डः सगोत्रस्तदभावे भिन्नगोत्रोऽपि ग्राह्य इत्याह शाकलः “सपिण्डापत्यकञ्चैव सगोत्रजमथापि वा। अपुत्रको द्विजो यस्मात् पुत्रत्वे परिकल्पयेत्। समानगोत्रजाभावे पालयेदन्यगोत्रजम्। दौहित्रं भागिनेयञ्च मातृस्वसृसुतं विना” इति। “अन्यत्र तु न कारयेदिति” ब्राह्मणातिरिक्तः क्षत्रियादिरसमानजातीयो दत्तको व्यावर्त्त्यते” यदाह मनुः। “माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः”। आपदि पुत्रप्रतिग्रहीतुरपुत्रत्वे सदृशं सजातीयम्। यत्तु “सदृशं न जातितः किन्तु कुलानुरूपैर्गुणैस्तेन क्षत्रियादिरपि ब्राह्मणस्य पुत्रो युज्यते”